# संस्कृतवार्ता:

दिनाङ्क : 30.07.2025 सायम् - 06:20

आदौ-मुख्यवार्ता:

- राज्यसभायां आपरेशन् सिन्दूर् इति विषये पुनः चर्चा आरब्धा। विदेशमन्त्री डा. एस्. जयशङ्करः अभियानस्य समये सशस्त्रसेनायाः प्रदर्शनस्य प्रशंसाम् अकरोत्।
- केन्द्रीय-रेलमन्त्री अश्विनी-वैष्णवः अवदत् यत् वर्षत्रयाणाम् अल्पावधौ सर्वाणि राज्यानि वंदेभारत इति रेल-सेवया आच्छादितानि सन्तीति।
- श्रीहरिकोटा-नगरस्य सतीश-धवन्-अन्तरिक्ष-केन्द्रात् अद्य सायङ्काले इस्रो-नासा इत्येतयो: सहयोगेन निसार् इति उपग्रहः सफलतया प्रक्षेपितः।
- रुस्-देशस्य कम्चत्का-द्वीपकल्पं निकषा प्रचण्डभूकम्पानन्तरं संयुक्तराज्यामेरिकादेशस्य रुस्-देशस्य, जपान्-देशस्य, हवायी-देशस्य च केषुचित् भागेषु सुनामी-तरङ्गाः आगताः। सम्पूर्णे प्रशान्तक्षेत्रे अपि पूर्वसूचनाः प्रदत्ताः सन्ति।

---

रा. स.-आपरेशन् सिन्दूर

पहलगामे जातस्य आतङ्काक्रमणस्य प्रतिक्रियारूपेण भारतस्य प्रबलस्य, सफलस्य निर्णायकस्य च आपरेशन् सिन्दूर् इत्यस्य विषये राज्यसभायां पुनः चर्चा आरब्धा। चर्चायां भागम् गृह्णन्, विदेशमन्त्री डा. एस्. जयशङ्करः आपरेशन् सिन्दूर् इत्यस्य स्थगने मध्यस्थता-अभियोगान् निराकृतवान्, सः अवदत् यत् अस्मिन् वर्षे द्वाविंशति-एप्रिलतः षोडशजून-पर्यन्तं प्रधानमन्त्रिणा नरेन्द्रमोदिना अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन सह कथञ्चिदपि दौरभाषिक-वार्तालापः न कृतः। सः अवदत् यत्, कोऽपि विश्वनेता भारतं तस्य कार्याणि स्थगयितुं नोक्तवानिति। सः अवदत् यत्, अमेरिका-देशस्य उपराष्ट्रपतिना सह वार्तालापकाले भारतं स्वपक्षं स्पष्टम् अकरोत् यत् यदि पाकिस्तानः आक्रमणं करोति तर्हि भारतं महदाक्रमणं कृत्वा

प्रतिक्रियां करिष्यतीति। आपरेशन् सिन्दूर् इत्यस्य सफलतायाः विषये मन्त्री अवदत् यत् पाकिस्तानस्य बहावलपुर्, मुरिड्के इत्यादीनां बृहत्तमानां भयोत्पादककेन्द्राणां महती क्षतिः अभवत् इति। सः अवदत् यत्, पाकिस्तानस्य विमानस्थलानां विनाशः, पाकिस्ताने भयोत्पादकानां अन्त्येष्टिक्रियाचित्राणि च आपरेशन् सिन्दूर् इत्यस्य सफलतायाः विषये वदन्ति। सः सशस्त्रसेनायाः प्रदर्शनस्य, क्षमतायाः च प्रशंसाम् अकरोत् येन देशः गौरवान्वितः अभवत्। सः अवदत् यत्, पहलगाम्-भयोत्पादक-आक्रमणस्य हेतुः जम्मू-कश्मीरस्य अर्थव्यवस्थायाः विनाशः आसीत्।

मन्त्री अवदत् यत्, भारतदेशः गतदशके आतङ्कवादेति विषयं वैश्विक-कार्यसूच्यत्वेन अनेक-वैश्विक-मञ्चेषु स्थापयितुं समर्थः अभवदिति। राज्यसभायां सत्तापक्षस्य भाजपेति दलाध्यक्षः च जे. पी. नड्डाः पहलगाम्-आतङ्काक्रमणस्य निन्दाम् अकरोत्। सः आरोपितवान् यत् यू. पी. ए. इति शासनकाले प्रतिवेशिदेशेन सह व्यापारेण सह भयोत्पादक-घटनाः अपि प्रचलन्ति स्म, परम् एन्. डी. ए. इत्यस्य सर्वकारः भयोत्पादनं विरुध्य कठोरतया युद्धं कुर्वन् अस्ति इति श्री. नड्डाः अवधानं दत्तवान्।

डी. एम्. के. पक्षस्य एन्. आर्. इलाङ्गो, टी. एम्. सी. पक्षस्य डोला सेन्, आर्. जे. डी. पक्षस्य मनोज झा, बी. जे. पी. पक्षस्य डा. के. लक्ष्मणः, काङ्ग्रेस् पक्षस्य अखिलेश् प्रसाद् सिङ्घ्, बी. जे. डी. पक्षस्य निरञ्जन् बिशी, समाजवादीपक्षस्य जया बच्चन् इत्यादयः बहवः सदस्याः चर्चायां भागम् अगृह्णन्। चर्चा च सम्प्रत्यपि प्रचलति।

----------------------------------------------------

**वैष्णव-वंदेभारत**

रेलमन्त्री अश्विनी वैष्णवः अवदत् यत् वर्षत्रयाणाम् अल्पावधौ सर्वाणि राज्यानि **वंदेभारत** इति रेल-सेवया आच्छादितानि सन्तीति। अद्य लोकसभायां एकस्य प्रश्नस्य प्रत्युत्तरे श्रीवैष्णवः सूचितवान् यत् सम्प्रति सम्पूर्णे देशे चतुश्चत्वारिंशदधिकैकशतसंख्यकाः वंदेभारत-सेवाः प्रचलन्ति।

श्रीवैष्णवः अवदत् यत् मध्यमवर्गस्य अल्प-आयवर्गस्य च कल्याणाय सर्वकारः प्रतिबद्धः अस्ति। सः अवदत् यत्, गतकतिपय वर्षेषु सामान्यवर्गीय जनरलकोचेति रेलयानप्रभागाणां सङ्ख्या वर्धिता अस्ति। मन्त्रिणा सूचितं यत् रेलयानेषु आहत्य द्व्यशीति-सहस्रकोचाख्यप्रभागेषु सप्ततिप्रतिशतं सामान्यवर्गीय रेलयानप्रभागाः वातानुकूलिताः नैव सन्ति।

------------------------------------------------

## इसरो-नासा

अद्य सायं काले इस्रो सिन्थेटिक-एपर्चर-रडार् इत्यस्य प्रक्षेपणम् सफलतया अभवत्। भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्घटनेन उक्तं यत्— आन्ध्रप्रदेशस्य श्रीहरिकोटा-क्षेत्रस्य सतीश-धवन-अन्तरिक्ष-केन्द्रात्, GSLV-F16 रॉकेट्-यानेन निसार-उपग्रहस्य प्रक्षेपणं सम्पन्नम्।

निसारः नासा–इस्रो-इत्यनयोः संयुक्त-वैज्ञानिकः प्रयासः अस्ति, यस्य उद्देश्यं पृथिव्याः भूमेः तथा हिम-आच्छादित-पृष्ठानाम् अध्ययनम् अस्ति।

------------------------------------------------

## सिन्धिया-सैबर्-फ्राड्ः

सम्प्रेषणमन्त्री ज्योतिरादित्यसिन्धिया इत्येषः अकथयत् यत् सञ्चारसाथीति उपक्रमस्य साहाय्येन एककोट्यधिकाः अवैधदूरसम्पर्कसङ्ख्याः विच्छेद्यन्तेति। अद्य लोकसभायां अनुपूरकप्रश्नान् समुत्तरयन् श्रीसिन्धिया इत्येषः सूचितवान् यत् अस्मिन् पोर्टल् इत्यत्र पञ्चत्रिंशल्लक्षतोधिकाः जनाः चरवाण्याः चौर्यप्रकरणानाम् नामाङ्कनं कृतवन्तः। सः अवदत् यत्, तेषु एकविंशतिलक्षतोऽधिकानि चोरितानि मोबाइल-यन्त्राणि च अन्विष्टानि, पञ्चलक्षाधिकानि यन्त्राणि स्वामिभ्यः प्रत्यर्पितान्यपि।

------------------------------------------------

## प्रधानमन्त्री-प्रधान-लेखः

राष्ट्रिय-शिक्षा-नीतिः विंशतिःविंशतिः इति कथं भारतीय-शिक्षां अधिक-समग्रतया, सर्वसमावेशकतया, भविष्यत्कालीय-सज्जतायै च परिवर्तयतीति व्यख्यायमानः एकः लेखः अद्य प्रधानमन्त्रिणा नरेन्द्रमोदिना स्वीकृतः। शिक्षामन्त्रालयस्य लेखस्य प्रतिक्रियारूपेण, श्रीमोदी, केन्द्रीयशिक्षामन्त्रिणः धर्मेन्द्रप्रधानस्य 'बहुभाषिकां, सर्वसमावेशीयां शिक्षां व्यापकरूपेण प्राप्तं भवतीति शीर्षके राष्ट्रिय-दैनिके लिखितं लेखम् समुद्धरत्।

-----------------------------------------------

## इण्डियन् क्लेस्ट् गार्ड-एम्. ओ. यु.

भारतीय-तटरक्षक-दलेन संयुक्त-अरब्-अमिरात्-देशस्य राष्ट्रिय-रक्षक-आदेशेन च अद्य नवदेहली-नगरे समुद्रीय-सुरक्षायाः सुरक्षायाश्च सहकारेति विषये सन्धिपत्रे हस्ताक्षराणि कृतानि। अस्य उद्देश्यं द्विपाक्षिक-समुद्रीय-सहकारं वर्धितुं, अस्मिन् क्षेत्रे सुरक्षितं, सुस्थिरं च समुद्रीय-पर्यावरणस्य कृते योगदानं दातुं च अस्ति।

-----------------------------------------------

## प्र. नि.-छत्तीसगढः

प्रवर्तन-निर्देशालयः छत्तीसगढस्य अनेकेषु स्थानेषु कथित-चिकित्सा-आपूर्ति-भ्रष्टाचारप्रकरणविषये अन्वेषणं कुर्वन् अस्ति। एकस्मिन् वक्तव्ये ई. डी. इत्यनेन उक्तम् यत् एते परिसराः मोक्षित्-कार्पोरेशन इत्यस्य शशाङ्क-चोपड़ा इत्यनेन उतो वा छत्तीसगढ-चिकित्सा-सेवा-निगम-लिमिटेड् इत्यस्य अधिकारिभिः सह सम्बद्धाः सन्तीति।

-----------------------------------------------

## पद्म पुरस्कारः

पद्मपुरस्कारेभ्यः नामाङ्कनस्य अनुशंसानाञ्च अन्तिमा तिथिः आगस्तमासस्य पञ्चदश-दिनाङ्कपर्यन्तं विस्तारिताऽस्ति। पुरस्कारार्थं नामाङ्कनानि केवलं राष्ट्रियपुरस्कार-पोर्टल् इत्यत्र अन्तर्जालद्वारा एव स्वीकरिष्यन्ते।

---------------------------------------------

**जे एंड के-अमरनाथ यात्राः**

प्रातःकालादेव निरन्तरं प्रचण्डवृष्ट्या पहलगाम्-बाल्टाल् इत्येतयोः आधारशिविरयोः वर्तमाना श्री-अमरनाथजी-यात्रा अद्य स्थगिता अस्ति। एतदतिरिच्य, यात्रामार्गेषु विद्यमानायाः ऋतोः दृष्ट्या, प्रचुर-सावधानतया, वर्तमानः श्री-अमरनाथ-जी-यात्रावाहन-समूहः श्वः जम्मू-नगरस्य भगवती-नगरतः न गमिष्यति।

---------------------------------------------

**राष्ट्रपतिः-प. बं.**

राष्ट्रपतिपदासीना द्रौपदी मुर्मु इत्येषा अद्य पश्चिमवङ्गस्य नादिया-मण्डले आयोजिते अखिलभारतीयवैद्यकीय-विज्ञान-संस्थानस्य कल्याणी इत्यत्र उद्घाटन-दीक्षान्त-समारोहे भागम् अगृह्णात्। आयुष् अथ स्वास्थ्य-परिवार-कल्याण-राज्यमन्त्री प्रतापराव् जाधवः अस्मिन् अवसरे उपस्थितः आसीत्। सः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य मार्गदर्शने सर्वकारः भारते विश्वस्तरीयायै चिकित्सासेवायै  कार्यं कुर्वन् अस्ति इति।

---------------------------------------------

**ऋतु-विभागः**

भारतस्य ऋतु-विज्ञान-विभागेन अद्य पूर्वी-राजस्थाने, पश्चिम-मध्य-प्रदेशे च अत्यन्तं प्रचण्डवृष्टेः "रेड्-अलर्ट्" इति सञ्चेतना प्रकाशिता। बिहारस्य, हिमाचल-प्रदेशस्य, पश्चिमोत्तर-प्रदेशस्य च केषुचित् स्थानेषु प्रचण्डवृष्टेः पूर्वानुमानं कृतमस्ति।

भारतस्य ऋतु-विभागानुसारम्, हिमाचल-प्रदेशे, जम्मू-कश्मीरे, उत्तराखण्डे च अत्यधिक-वृष्ट्यै नारङ्ग-वर्णीय-सञ्चेतना प्रसारिताऽस्ति। आकाशवाण्या सह संलापे भारतस्य ऋतु-विभागस्य वरिष्ठः वैज्ञानिकः आर.के. जेनामाणिः उक्तवान् यत् — "ओडिशा", "पश्चिमबङ्ग", "झारखण्ड-राज्येषु" अपि प्रचण्डवृष्टेः सम्भावना अस्तीति।

-----------------------------------------------

<u>रूसे भूकम्पः</u>

रूस-जापान-हवाई-देशानां केषुचित् भागेषु सुनामी-तरङ्गाः आगताः। रूसी-तटस्य समीपे विशाल-भूकम्पानन्तरम् अमेरिकासहितानां द्वादशाधिकेभ्यः देशेभ्यः संचेतनाः सन्ति प्रकाशिताः। अद्य प्रातः रूसस्य कामचाट्काद्वीप-समूहे अष्ट दशमलव अष्ट तीव्रतायाः प्रबलः भूकम्पः आगतः, येन प्रशान्त-महासागरे व्यापकरूपेण सुनामी-तरङ्गाः समुत्थिताः। प्रथमतरङ्गः भूकम्पस्य केवलं होरैककाले एव हवाई-देशं प्राप्तवान्।

।।इति वार्ता।।